३३

गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।रुद्रः। त्रिष्टुप्

**आ ते॑ पि॒तर्म॑रुतां सु॒म्नमे॑तु॒ मा नः॒ सूर्य॑स्य सं॒दृशो॑ युयोथाः।**

**अ॒भि नो॑ वी॒रो अर्व॑ति क्षमेत॒ प्र जा॑येमहि रुद्र प्र॒जाभि॑ः॥ २.०३३.०१**

मरुताम्- प्राणविशेषाणाम्। पितः- जनक। ते- तव। सुम्नम्- आनन्दः। आ एतु- मामागच्छतु। नः- अस्मान्। सूर्यस्य संदृशः- सूर्योपलक्षितात्मदर्शनात्। मा युयोथाः- मा पृथक्कुरु। वीरः- वीर्यसम्पन्नः सन्। नः- अस्मान्। अर्वति- प्राणचालने। अभि क्षमेत- सहस्व। रुद्र- वेगाधिदैवत। प्रजाभिः- धर्मसन्ततिभिः। प्र जायेमहि- प्रभूता भवेम ॥१॥

**त्वाद॑त्तेभी रुद्र॒ शंत॑मेभिः श॒तं हिमा॑ अशीय भेष॒जेभि॑ः।**

**व्य१॒॑स्मद्द्वेषो॑ वित॒रं व्यंहो॒ व्यमी॑वाश्चातयस्वा॒ विषू॑चीः॥ २.०३३.०२**

रुद्र- वेगाधिदैवत। त्वादत्तेभिः- त्वद्दत्तैः। शंतमेभिः- शिवैः। भेषजेभिः- भैषज्यैः। शतं हिमाः- शतसंवत्सरम्। अशीय- आयुषं भुञ्जेयम्। अस्मत्- अस्मत्तः। द्वेषः- द्वेषभावनम्। वितरम्- नाशय। अंहः- अघम्। वि- पृथक्कुरु। अमीवाः- रोगान्। चातयस्व- नाशय। विषूचीः- नानाकुत्सितगतीः। चातयस्व ॥२॥

**श्रेष्ठो॑ जा॒तस्य॑ रुद्र श्रि॒यासि॑ त॒वस्त॑मस्त॒वसां॑ वज्रबाहो।**

**पर्षि॑ णः पा॒रमंह॑सः स्व॒स्ति विश्वा॑ अ॒भीती॒ रप॑सो युयोधि॥ २.०३३.०३**

रुद्र। वज्रबाहो। जातस्य- हिरण्यगर्भाज्जातेषु। श्रिया- मङ्गळेन। श्रेष्ठः- उत्तमः। असि- भवसि। तवसां तवस्तमः- बलिनां वरिष्ठोसि। नः- अस्मान्। अंहसः- पापस्य। पारम्। स्वस्ति- मङ्गळाय। पर्षि- पारय। रपसः- पापस्य। अभीती- अभिगमनानि। विश्वा- सर्वाणि। युयोधि- मत्तः पृथक्कुरु ॥३॥

Dr. Rangaji
WEBOLIM

**मा त्वा॑ रुद्र चुक्रुधामा॒ नमो॑भि॒र्मा दुष्टु॑ती वृषभ॒ मा सहू॑ती।**
**उन्नो॑ वी॒राँ अ॑र्पय भेष॒जेभि॑र्भि॒षक्त॑मं त्वा भि॒षजां॑ श्रृणोमि॥ २.०३३.०४**

रुद्र। त्वा- भवन्तम्। नमोभिः- नमस्कारैः। मा चुक्रुधाम- मा क्रोधयाम। वृषभ- वर्षक। दुष्टुती सहूती- दुराचारसम्पन्नया स्तुत्या आहूत्या। मा- मा क्रोधयाम। आचारहीनं न पुनन्ति मन्त्रा आहुतय इति ज्ञायते। समिन्द्र गर्दभं मृण नुवन्तं पापयामुयेति श्रुतेः। भेषजेभिः- भैषज्यैः। नः- अस्माकं व्याधिग्रस्तान्। वीरान्। उत् अर्पय- आरोग्येणास्मभ्यं पुनरर्पय। भिषजां भिषक्तमम्- वैद्यनाथम्। त्वा- भवन्तम्। शृणोमि- श्रुत्या जानामि ॥४ ॥

**ह॒वीम॑भि॒र्हव॑ते॒ यो ह॒विर्भि॒रव॒ स्तोमे॑भी रु॒द्रं दि॑षीय।**
**ऋ॒दू॒दरः॑ सु॒हवो॒ मा नो॑ अ॒स्यै ब॒भ्रुः सु॒शिप्रो॑ रीरधन्म॒नायै॑॥ २.०३३.०५**

यः। हवीमभिः- हव्यसम्पन्नैः। हविभिः- आह्वानैः। हवते- आहूयते। तम्। रुद्रम्- वेगाधिदैवतम्। स्तोमेभिः- मन्त्रैः। अव दिषीय- इतरचित्तवृत्तितः पृथक्करोमि। तत्क्रोधतः पृथक्करोमीति वा। दो अवखण्डने। बभ्रुः- रक्तो रुद्रः। सुशिप्रः- शोभननासिकोपलक्षितशोभनप्राणायामपरायणः सन्। ऋदूदरः- प्राणायामेनैव मृदूदरः सन्। सुहवः- अस्माभिः सुष्ठु आहूतः। अस्यै मनायै- रुद्रस्यास्मै क्रोधाय। नः- अस्मान्। मा रीरधत्- मा वशिनः करोतु ॥५ ॥

**उन्मा॑ ममन्द वृष॒भो म॒रुत्वा॒न्त्वक्षी॑यसा॒ वय॑सा॒ नाध॑मानम्।**
**घृणी॑व च्छा॒याम॑र॒पा अ॑शी॒या वि॑वासेयं रु॒द्रस्य॑ सु॒म्नम्॥ २.०३३.०६**

वृषभः- वर्षकः। मरुत्वान्- मरुतां प्राणविशेषाणां जनको रुद्रः। नाधमानम्- याचमानम्। मा- माम्। त्वक्षीयसा- दीप्तेन। वयसा- भोगेन। उत् ममन्द- उत्कर्षेण तर्पयतु। घृणी- आतपक्लिन्नः। छायाम्। इव। अरपाः- अपापः। रुद्रस्य। सुम्नम्- आनन्दम्। अशीय- अनुभवेयम्। आ विवासेयम्- परिचरेयम् ॥६ ॥

Dr Ranganji
WEBOLIM

**क१ स्य ते रुद्र मृळयाकुर्हस्तो यो अस्ति भेषजो जलाषः।**

**अपभर्ता रपसो दैव्यस्याभी नु मा वृषभ चक्षमीथाः॥ २.०३३.०७**

रुद्र । मृळयाकुः- आनन्दकरः । भेषजः- आरोग्यकरः । जलाषः- सर्वेषां हितकरः । यः । ते- तव । हस्तः- करः । अस्ति- भवति । स्यः- सः । क्व । दैव्यस्य रपस्य- देवहेळनस्य । अपभर्ता- अपहर्ता सन् । वृषभ- वर्षक । नु- क्षिप्रम् । मा- माम् । चक्षमीथाः- क्षमस्व ॥७ ॥

**प्र बभ्रवे वृषभाय श्वितीचे महो महीं सुष्टुतिमीरयामि।**

**नमस्या कल्मलीकिनं नमोभिर्गृणीमसि त्वेषं रुद्रस्य नाम॥ २.०३३.०८**

बभ्रवे- रक्ताय । वृषभाय- वर्षकाय । श्वितीचे- शुक्लाय । महो महीम्- महतामपि महान्तम् । सुष्टुतिम्- शोभनमन्त्रम् । प्र ईरयामि- प्रेरयामि । नमस्य- पूजय । नमोभिः- नमस्कारैः । कल्मलीकिनम्- कल्मषरहितम् । त्वेषम्- दीप्तम् । रुद्रस्य नाम । गृणीमसि- गृणीमः ॥८ ॥

**स्थिरेभिरङ्गैः पुरुरूप उग्रो बभ्रुः शुक्रेभिः पिपिशे हिरण्यैः।**

**ईशानादस्य भुवनस्य भूरेर्न वा उ योषद्रुद्रादसुर्यम्॥ २.०३३.०९**

पुरुरूप- बहुरूप । उग्रः- उद्गूर्णः सन् । बभ्रुः- रक्तः सन् । शुक्रेभिः- शुक्लैः । हिरण्यैः- दीप्तैः । स्थिरेभिः- ध्याने स्थिरैः । अङ्गैः । पिपिशे- दीप्यते । पिश अवयवे । भूरेः- प्रभूतस्य । अस्य- एतस्य । भुवनस्य- जगतः । ईशानात्- ईश्वरात् । रुद्रात्- वेगाधिदैवतात् । असुर्यं- बलम् । न योषत्- न पृथग्भवति ॥९ ॥

**अर्हन्बिभर्षि सायकानि धन्वार्हन्निष्कं यजतं विश्वरूपम्।**

**अर्हन्निदं दयसे विश्वमभ्वं न वा ओजीयो रुद्र त्वदस्ति॥ २.०३३.१०**

अर्हन्- पूज्यः सन् । सायकानि धन्व- चापबाणादिकं स्वायुधम् । बिभर्षि- धारयसि । अर्हन्- पूज्यः सन् । विश्वरूपम्- विश्वात्मकम् । यजतम्- पूज्यं दातव्यं वा । निष्कम्- भूषणम् । बिभर्षि ।

Dr. Ranganji

WEBOLIM

विश्वस्यान्तः सन् विश्वमेव भूषणतया बिभर्षीति भावः। अर्हन्- पूज्यः सन्नेव। इदम्- एतत्। विश्वम्- सर्वम्। अभ्वम्- महत्। दयसे- रक्षसि। रुद्र- परमेश्वर। त्वत्- त्वत्तः। ओजीयः- तेजस्वितरम्। नास्ति। इदं वाक्यं रुद्रस्वरूपपरम्। यद्यपि रुद्रः संहारदेवता वेगाधिदेवता। तस्य स्वरूपमव्यवहार्यं निर्गुणमचिन्त्यमेकात्मप्रत्ययसारं शान्तं शिवमद्वैतं यत् सदाशिव इति नाम्ना प्रसिद्धं शैवागमेषु। रुद्रसूक्तेषु तत् स्वरूपं च स्तूयते। रुद्रस्तुतिश्च शाखाचन्द्रन्यायेन तत्स्वरूपं प्रदर्शयितुमेव भवति ॥१० ॥

**स्तु॒हि श्रु॒तं ग॑र्त॒सदं॒ युवा॑नं मृ॒गं न भी॒ममु॑पह॒त्नुमु॒ग्रम्।**
**मृ॒ळा ज॑रि॒त्रे रु॑द्र॒ स्तवा॑नो॒ऽन्यं ते॑ अ॒स्मन्नि व॑पन्तु॒ सेनाः॑॥ २.०३३.११**

श्रुतम्- श्रुतिवेद्यम्। गर्तसदम्- अगाधप्राणे स्थितम्। युवानम्- तरुणम्। मृगं न भीमम्- सिंहमिव भयङ्करम्। उपहत्नुम्- हन्तारम्। उग्रम्- उद्गूर्णम्। स्तुहि- कीर्तय। रुद्र- हे वेगाधिदैवत। स्तवानः- स्तुतः सन्। जरित्रे- रसनिष्पादकम्। मृळ- आनन्दय। अस्मदन्यम्- अस्मद्विरोधिनम्। ते- तव। सेनाः- गणाः। नि वपन्तु- निघ्नन्तु ॥११ ॥

**कु॒मा॒रश्चि॑त्पि॒तरं॒ वन्द॑मानं॒ प्रति॑ नानाम रुद्रोप॒यन्त॑म्।**
**भूरे॑र्दा॒तारं॒ सत्प॑तिं गृणीषे स्तु॒तस्त्वं भे॑ष॒जा रा॑स्य॒स्मे॥ २.०३३.१२**

रुद्र- वेगाधिदैवत। कुमारः- पुत्रः। वन्दमानं उपयान्तम्- सत्कारभावनेन स्वं प्रति आगच्छन्तम्। पितरम्- जनकम्। प्रति ननाम- यथा प्रतिनमस्कारं करोति तथा। गुणसम्पन्ने पुत्रेपि पितुः सत्कारभावना आवश्यक्येव। सत्कारदानेनैव सत्कारादानमपि भवितुमर्हति। भूरेः- प्रभूतस्य। दातारम्- दायकम्। सत्पतिम्- सतां पालकम्। गृणीषे- स्तुमः। अथवा यथा पितामहं नमन्तं स्वपितरं दृष्ट्वा तत्सदाचारं जानन् पुत्रः स्वपितरं नमति तथा महत्तत्त्वाधिदैवतं हिरण्यगर्भं वा

Dr. Ranganji
WEBOLIM

सर्वव्यापिनं विष्णुं वा गुणरहितं स्वस्वरूपं वा वन्दमानं रुद्रं दृष्ट्वा वयं तं स्तुम इति भावः। स्तुतः- वन्दितः। त्वम्। अस्मै- एतस्मै यजमानाय। भेषजा- भैषज्यानि। रास्व- देहि ॥१२॥

**या वो भेषजा मरुतः शुचीनि या शंतमा वृषणो या मयोभु।**
**यानि मनुरवृणीता पिता नस्ता शं च योश्च रुद्रस्य वश्मि॥ २.०३३.१३**

मरुतः- प्राणविशेषाः। वः- युष्माकम्। शुचीनि- शुद्धानि। भेषजा- भैषज्यानि। या- यानि। शन्तमा- शङ्कराणि। या- यानि। मयोभु- आनन्दकराणि भवन्ति। यानि। नः- अस्माकम्। पिता- मार्गदर्शी। मनुः- विद्वानाचार्यः। मन ज्ञाने। अवृणीत- वृणोति। रुद्रस्य। तानि। वश्मि- कामये। शम्- शान्तभावम्। योः- अशान्तिपृथक्करणम्। वश्मि ॥१३॥

**परि णो हेती रुद्रस्य वृज्याः परि त्वेषस्य दुर्मतिर्मही गात्।**
**अव स्थिरा मघवद्भ्यस्तनुष्व मीढ्वस्तोकाय तनयाय मृळ॥ २.०३३.१४**

नः- अस्मान्। रुद्रस्य- वेगाधिदैवतस्य। हेतिः- धनुः। परि वृज्याः- परिवर्जयतु। त्वेषस्य- दीप्तस्य। मही- महान्। दुर्मतिः- क्रोधः। परि गात्- परिवर्जयतु। स्थिरा- दृढानि धनूंषि। मघवद्भ्यः- हव्यवद्भ्यः। अव तनुष्व- अवततज्यानि कुरु। मीढ्वः- आनन्दकर। तोकाय तनयाय- त्वद्वत्सभूताय मह्यम्। मृळ- आनन्दं देहि ॥१४॥

**एवा बभ्रो वृषभ चेकितान यथा देव न हृणीषे न हंसि।**
**हवनश्रुन्नो रुद्रेह बोधि बृहद्वदेम विदथे सुवीराः॥ २.०३३.१५**

वृषभ- वर्षक। चेकितान- ज्ञानवन्। हवनश्रुत्- आह्वानश्रोतः। रुद्र। यथा। न। हृणीषे- क्रुध्यसि। न। हंसि। तथा। नः- अस्मान्। बोधि- बुध्यस्व ॥१५॥

Dr. Rangaji
WEBOLIM